॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ५

स निकामं विनामेषु विचरन्कामरूपधृक् ।
विचचार कपिर्लङ्कां लाघवेन समन्वितः ॥१॥

आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ।
प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥२॥

रक्षितं राक्षसैर्भीमैः सिंहैरिव महद्वनम् ।
समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥३॥

रूप्यकोपहितैश्चित्रैस्तोरणैर्हेमभूषितैः ।
विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्वृतम् ॥४॥

गजास्थितैर्महामात्रैः शूरैश्च विगतश्रमैः ।
उपस्थितमसंह्यार्यैर्हयैः स्यन्दनयायिभिः ॥५॥

सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतैः ।
घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥६॥

बहुरत्नसमाकीर्णं परार्ध्यासनभाजनम् ।
महारथसमावासं महारथमहासनम् ॥७॥

दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः ।
विविधैर्बहुसाहस्रैः परिपूर्णं समन्ततः ॥८॥

विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् ।
मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥९॥

मुदितप्रमदा रत्नं राक्षसेन्द्रनिवेशनम् ।
वराभरणनिर्ह्रादैः समुद्रस्वननिःस्वनम् ॥१०॥

तद्राजगुणसम्पन्नं मुख्यैश्च वरचन्दनैः ।
भेरीमृदङ्गाभिरुतं शङ्खघोषविनादितम् ॥११॥

नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा ।
समुद्रमिव गम्भीरं समुद्रमिव निःस्वनम् ॥१२॥

महात्मानो महेद्वश्म महारत्नपरिच्छदम् ।
महाजनसमाकीर्णं ददर्श स महाकपिः ॥१३॥

विराजमानं वपुषा गजाश्वरथसङ्कुलम् ।
लङ्काभरणमित्येव सोऽमन्यत महाकपिः ॥१४॥

गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ।
वीक्षमाणो ह्यसन्त्रस्तः प्रासादांश्च चचार सः ॥१५॥

अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ।
ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥१६॥

अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् ।
विभीषणस्य च तथा पुप्लुवे स महाकपिः ॥१७॥

महोदरस्य च तथा विरूपाक्षस्य चैव हि ।
विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च ।
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥१८॥

शुकस्य च महावेगः सारणस्य च धीमतः ।
तथा चेन्द्रजितो वेश्म जगाम हरियूथपः ॥१९॥

जम्बुमालेः सुमालेश्च जगाम हरियूथपः ।
रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥२०॥

धूम्राक्षस्य च सम्पातेर्भवनं मारुतात्मजः ।
विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥२१॥

शुकनाभस्य वक्रस्य शठस्य विकटस्य च ।
ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥२२॥

युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य नादिनः ।
विद्युज्जिह्वेन्द्रजिद्धानां तथा हस्तिमुखस्य च ॥२३॥

करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ।
क्रममाणः क्रमेणैव हनूमान्मारुतात्मजः ॥२४॥

तेषु तेषु महार्हेषु भवनेषु महायशाः ।
तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः ॥२५॥

सर्वेषां समतिक्रम्य भवनानि समन्ततः ।
आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ २६ ॥

रावणस्योपशायिन्यो ददर्श हरिसत्तमः ।
विचरन्हरिशार्दूलो राक्षसीर्विकृतेक्षणाः ।
शूलमुद्गरहस्ताश्च शक्तो तोमरधारिणीः ॥ २७ ॥

ददर्श विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे ॥ २८ ॥

रक्ताञ्श्वेतान्सितांश्चैव हरींश्चैव महाजवान् ।
कुलीनान्नृपसम्पन्नान्वाजान्परगजारुजान् ॥ २९ ॥

निष्ठितान्गजशिक्षायामैरावतसमान्युधि ।
निहन्तॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः ॥ ३० ॥

क्षरतश्च यथा मेघान्स्रवतश्च यथा गिरीन् ।
मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे परैः ॥ ३१ ॥

सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ।
हेमजालैरविच्छिन्नास्तरुणादित्यसंनिभाः ॥ ३२ ॥

ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ।
शिबिका विविधाकाराः स कपिर्मारुतात्मजः ॥ ३३ ॥

लतागृहाणि चित्राणि चित्रशालागृहाणि च ।
क्रीडागृहाणि चान्यानि दारुपर्वतकानपि ॥ ३४ ॥

कामस्य गृहकं रम्यं दिवागृहकमेव च ।
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३५ ॥

स मन्दरतलप्रख्यं मयूरस्थानसङ्कुलम् ।
ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् ॥ ३६ ॥

अनन्तरत्ननिचयं निधिजालं समन्ततः ।
धीरनिष्ठितकर्मान्तं गृहं भूतपतेरिव ॥ ३७ ॥

अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च ।
विरराजाथ तद्वेश्म रश्मिमानिव रश्मिभिः ॥ ३८ ॥

जाम्बूनदमयान्येव शयनान्यासनानि च ।
भाजनानि च शुभ्राणि ददर्श हरियूथपः ॥ ३९ ॥

मध्वासवकृतक्लेदं मणिभाजनसङ्कुलम् ।
मनोरममसम्बाधं कुबेरभवनं यथा ॥ ४० ॥

नूपुराणां च घोषेण काञ्चीनां निनदेन च ।
मृदङ्गतलघोषैश्च घोषवद्भिर्विनादितम् ॥ ४१ ॥

प्रासादसङ्घातयुतं स्त्रीरत्नशतसङ्कुलम् ।
सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहम् ॥ ४२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com